# vichakhnugItA

# વિચખ્નુગીતા

## Document Information

Text title : vichakhnugItA

File name : vichakhnugiitaa.itx

Category : gItA, giitaa

Location : doc_giitaa

Transliterated by : Professor Tokunaga in Kyoto system(?)

Proofread by : Sunder Hattangadi

Latest update : June 2, 1998

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 22, 2023

*sanskritdocuments.org*

vichakhnugItA

# વિચખ્નુગીતા

અધ્યાયઃ ૨૫૭

ભી

અત્રાપ્યુદાહરન્તીમમિતિહાસં પુરાતનમ્ ।
પ્રજાનામનુકમ્પાર્થં ગીતં રાજ્ઞા વિચખ્નુના ॥ ૧॥

છિન્નસ્થૂનં વૃષં દૃષ્ટ્વા વિરાવં ચ ગવાં ભૃશમ્ ।
ગોગ્રહે યજ્ઞવાતસ્ય પ્રેક્ષમાણઃ સ પાર્થિવઃ ॥ ૨॥

સ્વસ્તિ ગોભ્યોઽસ્તુ લોકેષુ તતો નિર્વચનં કૃતમ્ ।
હિંસાયાં હિ પ્રવૃત્તાયામાશીરેષાનુકલ્પિતા ॥ ૩॥

અવ્યવસ્થિત મર્યાદૈર્વિમૂઢૈર્નાસ્તિકૈર્નરૈઃ ।
સંશયાત્મભિરવ્યક્તૈર્હિંસા સમનુકીર્તિતા ॥ ૪॥

સર્વકર્મ સ્વહિંસા હિ ધર્માત્મા મનુરબ્રવીત્ ।
કામરાગાદ્વિહિંસન્તિ બહિર્વેદ્યાં પશૂન્નરાઃ ॥ ૫॥

તસ્માત્પ્રમાનતઃ કાર્યો ધર્મઃ સૂક્ષ્મો વિજાનતા ।
અહિંસૈવ હિ સર્વેભ્યો ધર્મેભ્યો જ્યાયસી મતા ॥ ૬॥

ઉપોષ્ય સંશિતો ભૂત્વા હિત્વા વેદ કૃતાઃ શ્રુતીઃ ।
આચાર ઇત્યનાચારાઃ કૃપણાઃ ફલહેતવઃ ॥ ૭॥

યદિ યજ્ઞાંશ્ચ વૃક્ષાંશ્ચ યૂપાંશ્ચોદ્દિશ્ય માનવાઃ ।
વૃથા માંસાનિ ખાદન્તિ નૈષ ધર્મઃ પ્રશસ્યતે ॥ ૮॥

માંસં મધુ સુરા મત્સ્યા આસવં કૃસરૌદનમ્ ।
ધૂર્તૈઃ પ્રવર્તિતં હ્યેતન્નૈતદ્વેદેષુ કલ્પિતમ્ ॥ ૯॥

કામાન્મોહાચ્ચ લોભાચ્ચ લૌલ્યમેતત્પ્રવર્તિતમ્ ।
વિષ્ણુમેવાભિજાનન્તિ સર્વયજ્ઞેષુ બ્રાહ્મણાઃ ।

પાયસૈઃ સુમનોભિશ્ચ તસ્યાપિ યજનં સ્મૃતમ્ ॥ ૧૦॥

યજ્ઞિયાશ્ચૈવ યે વૃક્ષા વેદેષુ પરિકલ્પિતાઃ ।
યચ્ચાપિ કિં ચિત્કર્તવ્યમન્યચ્ચોક્ષૈઃ સુસંસ્કૃતમ્ ।
મહાસત્ત્વૈઃ શુદ્ધભાવૈઃ સર્વં દેવાર્હમેવ તત્ ॥ ૧૧॥

ય્
શરીરમાપદશ્ચાપિ વિવદન્ત્યવિહિંસતઃ ।
કથં યાત્રા શરીરસ્ય નિરારમ્ભસ્ય સેત્સ્યતિ ॥ ૧૨॥

ભી
યથા શરીરં ન ગ્લાયેન્નેયાન્મૃત્યુવશં યથા ।
તથા કર્મસુ વર્તેત સમર્થો ધર્મમાચરેત્ ॥ ૧૩॥

॥ ઇતિ વિચખ્નુગીતા સમાપ્તા ॥

Adhyaya number 257 in shAntiparva, Mahabharata critical edition
(Bhandarkar Oriental Research Institute BORI).
In Kinjavadekar's edition it is 265.

Sunder Hattangadi

---

*vichakhnugItA*

pdf was typeset on December 22, 2023

Please send corrections to *sanskrit@cheerful.com*